२२

स्वादितः रुधादिपर्यन्तम्-
सु तुद् रुध् धातवः

प्रस्तावना

भवन्तः इतः पूर्वस्मिन् पाठे अदादिगणः, जुहोत्यादिगणः, दिवादिगणः च इति गणत्रयस्य परिचयं प्राप्तवन्तः। अधुना स्वादिगणः, तुदादिगणः, रुधादिगणः च इति गणत्रयं ज्ञास्यति। पूर्ववत् अत्रापि प्रतिगणं विकरणभेदः अस्ति, विकरणभेदात् च रूपभेदो भवति। यथा स्वादिगणीयधातुभ्यः श्नुविकरणप्रत्ययः, तुदादिगणीयधातुभ्यः शविकरणप्रत्ययः, रुधादिगणीयधातुभ्यः श्नाविकरणप्रत्ययः च भवति। विकरणभेदात् रूपभेदः, तद्यथा सु-धातोः श्नुविकरणे सुनोति इति रूपम्, तुद्-धातोः शविकरणे तुदति इति रूपम्, रुध्-धातोः श्नाविकरणे रुणद्धि इति रूपं भवति। अस्मिन् पाठे न सर्वाणि रूपाणि ससूत्रं प्रदर्शयिष्यन्ते अन्यथा पाठपरिमाणम् एधेत। पूर्वतनपाठवत् अस्मिन् पाठेऽपि प्रतिगणं प्रथमधातुरेव आलोचयिष्यते। धात्वन्तरस्य प्रक्रियाः तु स्वयं बोद्धव्याः।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- प्रतिगणं कीदृशं विकरणं भवति तज्ज्ञास्यति।
- विकरणविधायकसूत्रार्थम् अवगमिष्यति।
- तत्र तत्र व्याख्यातानि विशेषसूत्राणि ज्ञास्यति।
- सु-धातुरूपाणि साधयितुं शक्नुयात्।
- तुद्-धातुरूपाणि साधयितुं पारयेत्।
- रुध्-धातुरूपाणि साधयितुम् अर्हेत्।
- एतज्ज्ञात्वा च अन्यानि अपि धातुरूपाणि साधयितुं प्रभवेत्।
- तत्र तत्र प्रदर्शितानि वैकल्पिकरूपाणि अपि अवगमिष्यति।

अथ स्वादिगणः

षुञ् अभिषवे इति उभयपदिनः अनिटः स्वादिगणीयधातोः वर्तमानक्रियावृत्तित्वविवक्षायां कर्तरि **लटि** परस्मैपदसंज्ञके तिपि सु ति इति जाते कर्तरि शप् इति शपि प्राप्ते सूत्रमिदमारभ्यते -

[२२.१] स्वादिभ्यः श्नुः॥ (३.१.७३)

सूत्रार्थः - स्वादिगणपठितधातुभ्यः श्नुप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। स्वादिभ्यः (५/३), श्नुः (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिकृतम्। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः श्नुः प्रत्ययः परः इति। स्वादिगणः दशसु धातुगणेषु पञ्चमः। सुः आदिः येषाम् (धातूनाम्) ते स्वादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः स्वादिभ्यः। सूत्रार्थो हि कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये परतः स्वादिगणपठितधातुभ्यः श्नुप्रत्ययः परो भवति। श्नुप्रत्ययस्य शकारः इत्संज्ञकः लशक्वतद्धिते इत्यनेन। अतः नु-मात्रम् शिष्यते। योगोऽयम् कर्तरि शप् इत्यस्य अपवादः।

अत्र विशेषः - श्नुप्रत्ययस्य शित्त्वात् तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञा। अपि च सार्वधातुकसंज्ञकस्य अस्य श्नुप्रत्ययस्य अपित्त्वात् सार्वधातुकमपित् इत्यनेन ङिद्वद्भावः। यस्य फलम् अस्ति गुणनिषेधः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण सु ति इति स्थिते प्राप्तं शपं प्रबाध्य प्रकृतसूत्रेण श्नुप्रत्ययो भवति। यतो हि अत्र ति इति कर्त्रर्थकसार्वधातुकप्रत्ययः परोऽस्ति। ततः सु नु ति इति जाते नु इत्यस्य तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञायां सार्वधातुकार्धधातुकयोः इत्यनेन सोः उकारस्य गुणः प्राप्तः। तदा श्नुप्रत्ययः अपित् सार्वधातुकम् च अस्ति इति हेतोः सार्वधातुकमपित् इत्यनेन ङिद्वद्भावो भवति। तेन क्ङिति च इत्यनेन गुणनिषेधः। ततः तिप्रत्ययस्य सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन नोः उकारस्य गुणे ओकारे **सुनोति** इति रूपं सिध्यति। द्विवचने तसि तसः अपित्त्वात् सार्वधातुकत्वात् च ङिद्वद्भावे न नोः उकारस्य गुणः। ततः सकारस्य रुत्वे रेफस्य च विसर्गे **सुनुतः** इति रूपम्। बहुवचने झिप्रत्यये अन्तादेशे सु नु अन्ति इति जाते नोः उकारस्य स्थाने इको यणचि इति यणि प्राप्ते तं बाधित्वा अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन उवङि प्राप्ते सूत्रमिदमारभ्यते -

[२२.२] हुश्नुवोः सार्वधातुके॥ (६.४.८७)

सूत्रार्थः - हुश्नुवोरनेकाचोऽसंयोगपूर्वस्योवर्णस्य यण् स्यादचि सार्वधातुके।

सूत्रव्याख्या - विधिसूत्रमिदम् पदद्वयात्मकम्। सूत्रेण अनेन यणादेशो विधीयते। हुश्नुवोः (६/२), सार्वधातुके (७/१) इति सूत्रगतपदच्छेदः। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यतः अचि (७/१)

इत्यस्य, एरनेकाचोऽसंयोगपूर्वस्य इत्यतः अनेकाचः (६/१), असंयोगपूर्वस्य (६/१) इत्यनयोः, ओः सुपि इत्यतः ओः (६/१) इत्यस्य, इणो यण् इत्यतः यण् (१/१) इत्यस्य च अनुवृत्तिर्भवति। अङ्गस्य (६/१) इत्यधिकृतम्। अचि सार्वधातुके हुश्नुवोः अनेकाचः अङ्गस्य असंयोगपूर्वस्य ओः यण् इति पदयोजना। सार्वधातुके इत्यस्य विशेषणम् अचि इति। अतः यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधौ अजादौ सार्वधातुके इत्यर्थलाभः। श्नुः प्रत्ययः अतः प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषया श्नु इत्यनेन श्नुप्रत्ययान्तस्य ग्रहणम्। अनेकाचः इति पदम् श्नुप्रत्ययान्तेन अङ्गेन सह सम्बद्धम्। नास्ति संयोगः पूर्वः यस्मात् असौ इति बहुव्रीहिसमासे असंयोगपूर्वः, तस्य असंयोगपूर्वस्य। असंयोगपूर्वस्य इति पदम् ओः इत्यस्यैव विशेषणम् न तु श्नु इत्यस्यापि। हुश्च श्नुश्च तयोः इतरेतरयोगद्वन्द्वे हुश्नुवौ, तयोः हुश्नुवोः। सूत्रार्थस्तावत् - अजादौ सार्वधातुके परतः जुहोतेः श्नुप्रत्यययान्तस्य अनेकाचः अङ्गस्य च असंयोगपूर्वस्य उकारस्य स्थाने यणादेशः स्यात् इति। स्थानेऽन्तरतमः इति परिभाषया उकारस्य स्थाने वकारादेशः भवति। योगोऽयम् अचि श्नुधातु...इत्यादिना प्राप्तस्य उवङः अपवादः।

उदाहरणे सूत्रार्थसमन्वयः -

पूर्वोक्तप्रकारेण सु नु अन्ति इति स्थिते अचि श्नुधातु...इत्यादिना योगेन प्राप्तम् उवङादेशं बाधित्वा हुश्नुवोः सार्वधातुके इत्यनेन नोः उकारस्य स्थाने यणादेशो भवति। यतो हि सुनु इति श्नुप्रत्ययान्तः अनेकाच् अङ्गमस्ति। तस्य च अङ्गस्य अवयवः उकारः असंयोगपूर्वः अपि अस्ति। ततः वर्णसम्मेलने **सुन्वन्ति** इति रूपं भवति। सिपि मिपि च सुनोति इति रूपवत् प्रक्रिया बोद्धव्या। सिपि षत्वम् आदेशप्रत्यययोः इति योगेन। उत्तमपुरुषद्विवचने वसि सुनु वस्, उत्तमपुरुषबहुवचने मसि सुनु मस् इति स्थिते अग्रिमसूत्रमारभ्यते -

[२२.३] लोपश्चास्यान्यतरस्यां म्वोः॥ (६.४.१०७)

सूत्रार्थः - असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा म्वोः परयोः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पञ्च पदानि सन्ति। लोपः (१/१), च (अव्ययम्) अस्य (६/१), अन्यतरस्याम् (७/१), म्वोः (७/२) इति सूत्रगतपदच्छेदः। सूत्रस्थेन अस्य इति पदेन उतश्च प्रत्ययादसंयोगपूर्वात् (६.४.१०६) इत्यस्य परामर्शः। उतश्च प्रत्ययादसंयोगपूर्वात् इत्यतः उतः (५/१), प्रत्ययात् (५/१), असंयोगपूर्वात् (५/१) इत्येतेषाम् अनुवृत्तिर्भवति। तेषां त्रयाणामपि षष्ठ्येकवचनान्ततया विपरिणामो भवति। अङ्गस्य इत्यधिकृतम्। असंयोगपूर्वस्य प्रत्ययस्य उतः अङ्गस्य म्वोः अन्यतरस्याम् लोपः इति पदयोजना। अधिकृतस्य अङ्गस्य इत्यस्य उतः इति पदम् विशेषणम्। अतः तदन्तविधौ उदन्तस्य अङ्गस्य इत्यर्थलाभः। असंयोगपूर्वः यः प्रत्ययः (प्रत्ययावयवः) उकारः तदन्तस्य अङ्गस्य लोपो वा स्यात् म्वोः परयोः इति सूत्रार्थः। अलोऽन्त्यस्य इति परिभाषया अयमादेशः उदन्ताङ्गस्य अन्त्यस्यैव अलः उकारस्य स्थाने भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण सुनु वस् इत्यत्र सुनु मस् इत्यत्र च उकारः श्नुप्रत्ययावयवः अस्ति। अपि च उकारात् पूर्वम् संयोगवर्णः नास्ति। तस्मात् उकारः असंयोगपूर्वः। किञ्च

सुनु इति उकारान्तम् अङ्गम् अपि अस्ति। अपि च तस्मात् उकारान्तात् अङ्गात् परे (वसः) वकारः, (मसः) मकारः च अस्ति। अतः प्रकृतसूत्रेण श्नुप्रत्ययावयवस्य उकारस्य विकल्पेन लोपे यथाक्रमम् **सुन्वः, सुन्मः** इति रूपे भवतः। लोपाभावपक्षे च **सुनुवः, सुनुमः** इति रूपे भवतः।

तथा हि **लटि** परस्मैपदे रूपाणि - **सुनोति, सुनुतः, सुन्वन्ति। सुनोषि, सुनुथः, सुनुथ। सुनोमि, सुन्वः-सुनुवः, सुन्मः-सुनुमः।**

अत्र अवधेयम् - (षुञ्) सुधातोः ञित्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे सुधातोः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इति परस्मैपदप्रत्ययो भवति।

आत्मनेपदस्थले तादिषु न कोऽपि पित्-प्रत्ययः। अतः सार्वधातुकमपित् इत्यनेन तादिः सर्वोऽपि प्रत्ययः ङित् भवति। तस्मात् सर्वत्रैव नोः उकारस्य गुणनिषेधः। किञ्च श्नुप्रत्ययस्य ङित्त्वात् न सोः उकारस्य गुणः इत्यपि अवधेयम्। वहिप्रत्यये महिङ्प्रत्यये च लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन नोः उकारस्य विकल्पेन लोपः। अत्र अचि परे हुश्नुवोः सार्वधातुके इत्यनेन यण् भवति। किञ्च टित आत्मनेपदानां टेरे इत्यनेन एत्त्वं भवति। सोः थासि सुनु थास् इति स्थिते थासः से इत्यादेशे सुनु से इति जाते आदेशप्रत्यययोः इति सकारस्य षत्वम्। उत्तमपुरुषैकवचने इटि सुनु इ इति जाते नोः उकारस्य हुश्नुवोः सार्वधातुके इति यणि वकारे टेः एत्वे सुन्वे इति रूपम्। वहौ महिङि च लोपश्चास्यान्यतरस्यां म्वोः इति विकल्पेन उकारलोपः।

तथा हि आत्मनेपदे लटि रूपाणि - **सुनुते, सुन्वाते, सुन्वते। सुनुषे, सुन्वाथे, सुनुध्वे। सुन्वे, सुन्वहे-सुनुवहे, सुन्महे-सुनुमहे।**

लिटि द्वित्वादिकार्ये कृते सति आदेशप्रत्यययोः इत्यनेन द्वितीयसकारस्य षत्वम्। लिट् च इति योगेन लिडादेशः तिङ् आर्धधातुकः। अतः अजादिप्रत्ययेषु परतः हुश्नुवोः सार्वधातुके (६.४.८७) इत्यस्य अप्रवृत्तौ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७) इत्यनेन उवङ् भवति। थलि आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधे प्राप्ते तं बाधित्वा क्रादिनियमानुसारं नित्यम् इटि प्राप्ते तस्यापि अचस्तास्वत्थल्यनिटो नित्यम् इत्यनेन निषेधः प्राप्तः। तदा तं बाधित्वा भारद्वाजनियमेन वैकल्पिकः इडागमः। ततः इड्भावे इडभावे चेति पक्षद्वयेऽपि गुणः। वसि मसि तु क्रादिनियमानुसारम् नित्यम् इडागमः। मिपि णलुत्तमो वा इति णित्त्वविकल्पः।

तथा हि लिटि परस्मैपदे रूपाणि - **सुषाव, सुषुवतुः, सुषुवुः। सुषविथ-सुषोथ, सुषुवथुः, सुषुव। सुषाव-सुषव, सुषुविव, सुषुविम।**

आत्मनेपदस्थलेऽपि अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७) इत्यनेन उवङ् भवति। लिटि तप्रत्यये लिटस्तझयोरेशिरेच् इत्यनेन तकारस्य स्थाने एशादेशे सु ए इति जाते लिटि धातोरनभ्यासस्य इत्यनेन सु इत्यस्य द्वित्वे सु सु ए इति जाते अनभ्यासस्य सोः उकारस्य उवङि अनुबन्धलोपे सु स् उव् ए इति जाते अनभ्यासस्य सकारस्य आदेशप्रत्यययोः इति षत्वे **सुषुवे** इति रूपम्। झप्रत्यये झस्य स्थाने लिटस्तझयोरेशिरेच् इति सूत्रेण इरेच् इत्यादेशे अनुबन्धलोपे द्वित्वादिकार्ये विहिते सति सुषु इरे इति जाते

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति उवङादेशे **सुषुविरे** इति रूपम्। ध्वमि प्रक्रियया सुषुव् इ ध्वे इति जाते वकारः इण् अस्ति। तस्मात् परम् इट् अस्ति। अतः इटः परस्य लिडादेशस्य ध्वमः धस्य स्थाने विकल्पेन ढत्वम् विभाषेटः इत्यनेन। अत्र लिटि हुश्नुवोः सार्वधातुके इति न प्रवर्तते लिटः आर्धधातुकत्वात्। तप्रत्ययं, झप्रत्ययं, थास्प्रत्ययं च विहाय अन्यत्र टित आत्मनेपदानां टेरे इत्यनेन एत्त्वं भवति। थासि ध्वमि वहौ महिङि च क्रादिनियमानुसारम् नित्यम् इडागमः।

तथा हि आत्मनेपदे रूपाणि – **सुषुवे, सुषुवाते, सुषुविरे। सुषुविषे, सुषुवाथे, सुषुविढ्वे-सुषुविध्वे। सुषुवे, सुषुविवहे, सुषुविमहे।**

{सूत्रम्. **विभाषेटः** (८.३.७९) = इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा ढः।}

लुटि प्राप्तस्य श्नुप्रत्ययस्य अपवादस्य तासः आर्धधातुकं शेषः इति आर्धधातुकसंज्ञा अस्ति। अतः तासि परे सर्वत्रैव सार्वधातुकार्धधातुकयोः इति गुणे सो इति भवति। रूपाणाम् प्रक्रिया भूधातुवत् ज्ञेया। अत्र लुटि श्नुप्रत्ययापवादस्य तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपेदेशेऽनुदात्तात् इत्यनेन तन्निषेधः।

तथा हि परस्मैपदे रूपाणि - **सोता, सोतारौ, सोतारः। सोतासि, सोतास्थः, सोतास्थ। सोतास्मि, सोतास्वः, सोतास्मः।**

प्रथमपुरुषे उभयविधस्थले समानम् रूपम्। यतो हि स्थानिभेदे सत्यपि आदेशसाम्यम् अत्र अस्ति। तद्यथा परस्मैपदस्थले लुटः प्रथमस्य डारौरसः इत्यनेन तिप् तस् झि इत्येतेषाम् स्थाने यथाक्रमम् डा रौ रस् इत्यादेशा विधीयन्ते। आत्मनेपदस्थले त आताम् झ इत्येतेषाम् स्थाने यथाक्रमम् डा रौ रस् इत्यादेशा विधीयन्ते इति आदेशसाम्यम् स्पष्टम् एव। थासि तासि थासः से इत्यादेशे सोतास् से इति स्थिते तासस्त्योर्लोपः इति तासः सकारलोपः। ध्वमि सोतास् ध्वम् इति स्थिते धि च इति तासः अवयवस्य सकारस्य लोपः। उत्तमपुरुषैकवचने इटि सोतास् इ इति स्थितौ सकारस्य ह एति इति हकारः। थासं विहाय आथामादौ टित आत्मनेपदानां टेरे इति टेः एत्वम्। पूर्ववत् इण्निषेधः।

तथा हि आत्मनेपदे रूपाणि - **सोता, सोतारौ, सोतारः। सोतासे, सोतासाथे, सोताध्वे। सोताहे, सोतास्वहे, सोतास्महे।**

लृटि प्राप्तस्य श्नुप्रत्ययस्य अपवादस्य स्यस्य आर्धधातुकसंज्ञा अस्ति। अतः तस्मिन् परे सर्वत्रैव गुणो भवति। किञ्च आदेशप्रत्यययोः इत्यनेन षत्वमपि भवति। आत्मनेपदस्थले टित आत्मनेपदानां टेरे इत्यनेन एत्त्वं भवति। श्नुप्रत्ययापवादस्य स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपेदेशेऽनुदात्तात् इत्यनेन तन्निषेधः। ततः परस्मैपदे रूपाणि - **सोष्यति, सोष्यतः, सोष्यन्ति। सोष्यसि, सोष्यथः, सोष्यथ। सोष्यामि, सोष्यावः, सोष्यामः।**

आत्मनेपदस्थले थासं विहाय टित आत्मनेपदानां टेरे इति टेः एत्वम्। इण्निषेधः पूर्ववत्। आत्मनेपदे रूपाणि च - **सोष्यते, सोष्येते, सोष्यन्ते। सोष्यसे, सोष्येथे, सोष्यध्वे। सोष्ये, सोष्यावहे, सोष्यामहे।**

लोटि परस्मैपदे रूपाणि - **सुनोतु** - (तातङि) **सुनुतात्, सुनुताम्, सुन्वन्तु**। सिपि सु नु सि इति स्थिते सेर्ह्यपिच्च इत्यनेन सेः स्थाने हि इत्यादेशे सु नु हि इति जाते सूत्रमिदमारभ्यते -

[२२.४] उतश्च प्रत्ययादसंयोगपूर्वात्॥ (६.४.१०६)

सूत्रार्थः - असंयोगपूर्वात् प्रत्ययोतो हेर्लुक्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदचतुष्टयम् अस्ति। सूत्रेणानेन हेर्लुक् विधीयते। उतः (५/१), च (अव्ययम्), प्रत्ययात् (५/१), असंयोगपूर्वात् (५/१) इति सूत्रगतपदच्छेदः। अतो हेः इत्यतः हेः (६/१) इत्यस्य, चिणो लुक् इत्यतः लुक् (१/१) इत्यस्य च अनुवृत्तिर्भवति। अङ्गस्य (६/१) इत्यधिकृतम्। तस्य च पञ्चम्येकवचनान्ततया विपरिणामः। नास्ति संयोगः पूर्वः यस्मात् असौ असंयोगपूर्वः इति बहुव्रीहिसमासः, तस्मात् असंयोगपूर्वात्। अङ्गात् इत्यस्य विशेषणमस्ति उतः इति। अतः तदन्तविधौ उदन्तात् अङ्गात् इत्यर्थलाभः। असंयोगपूर्वः यः प्रत्ययः (प्रत्ययावयवः) उकारः तदन्तात् अङ्गात् परस्य हेर्लुक् स्यात् इति सूत्रार्थः। प्रत्ययस्य लुक्श्लुलुपः इत्यनुसारम् प्रत्ययादर्शनस्यैव लुक्संज्ञा विधीयते। अतः हेः लुक् भवति इत्युक्ते सम्पूर्णस्य हेः अदर्शनम् भवति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण सुनु हि इति जाते उतश्च प्रत्ययादसंयोगपूर्वात् इति प्रकृतसूत्रेण हेः लुकि **सुनु** इति रूपं भवति। तातङ्पक्षे **सुनुतात्** इति रूपमपि जायते। मिपि सुनु मि इति जाते मेर्निः इति मिस्थाने नि इत्यादेशे सुनु नि इति आडुत्तमस्य पिच्च इति आडागमे सुनु आ नि इति जाते नोः उकारस्य गुणे ओकारे अवादेशे वर्णसम्मेलने **सुनवानि** इति रूपम्। सुनु वस्, सुनु मस् इत्यत्र आडुत्तमस्य पिच्च इति आडागमे सागमकस्य वसः मसश्च पिद्वद्भावे सार्वधातुकमपित् इति ङित्त्वम् न भवति। तेन क्ङिति च इति गुणनिषेधोऽपि न। ततः नित्यं ङितः इति सकारलोपे **सुनवाव, सुनवाम** इति रूपम्। नित्यं ङितः इति सकारलोपः।

तथा हि लोटि परस्मैपदे रूपाणि - **सुनोतु-सुनुतात्, सुनुताम्, सुन्वन्तु। सुनु-सुनुतात्, सुनुतम्, सुनुत। सुनवानि, सुनवाव, सुनवाम।**

आत्मनेपदस्थले उत्तमपुरुषं विहाय अन्यत्र सार्वधातुकमपित् इति ङिद्वद्भावः। उत्तमपुरुषे तु आडुत्तमस्य पिच्च इत्यनेन पिद्वद्भावे सार्वधातुकमपित् इति न ङित्त्वम्। तेन क्ङिति च इति गुणवृद्धिनिषेधोऽपि न। प्रथमपुरुषैकवचने तप्रत्यये एत्वे सुनु ते इति जाते आमेतः इति एकारस्य स्थाने आम्-आदेशे **सुनुताम्** इति रूपम्। आतामि सुनु आताम् इति जाते टेः आमः एत्वे सुनु आते इति जाते आमेतः इति एकारस्य आम्-आदेशे सुनु आताम् इति जाते हुश्नुवोः सार्वधातुके इत्यनेन नोः उकारस्य स्थाने यणि वकारे **सुन्वाताम्** इति रूपम्। आथामि एवमेव प्रक्रिया। झे प्रक्रियया सुनु झ इति स्थिते झोऽन्तः इत्यस्य आत्मनेपदेष्वनतः इति अपवादसूत्रेण केवलस्य झकारस्य स्थाने अत् इत्यादेशे सुनु अत् अ इति जाते टेः अकारस्य एकारे सुनु अत् ए इति जाते आमेतः इति एकारस्य स्थाने आमादेशे सुनु अत् आम् इति जाते हुश्नुवोः सार्वधातुके इति नोः उकास्य स्थाने यणि वकारे सुन् व् अत् आम् इति जाते वर्णसम्मेलने **सुन्वताम्** इति रूपम्। थासि सुनु थास् इति स्थिते थासः से इत्यादेशे सुनु से इति जाते सकारात् परस्य एकारस्य सवाभ्यां वामौ इति एकारस्य वकारादेशे आदेशप्रत्यययोः इति सकारस्य षकारे

कृते **सुनुष्व** इति रूपम्। ध्वमि सुनु ध्वम् इति स्थिते टेः अमः एत्वे सुनु ध्वे इति जाते वकारात् परस्य एकारस्य सवाभ्यां वामौ इति अमादेशे **सुनुध्वम्** इति रूपम्। इटि सु नु इ इति स्थिते टिसंज्ञकस्य इकारस्य एत्वे एत ऐ इति सूत्रेण प्रत्ययस्य एकारस्य स्थाने ऐकारादेशे सुनु ऐ इति जाते आडुत्तमस्य पिच्च इति आडागमे सागमकस्य ऐ इत्यस्य पित्त्वात् सार्वधातुकमपित् इति न ङित्त्वम्। तेन क्ङिति च इति न गुणनिषेधः। अतः सार्वधातुकार्धधातुकयोः इत्यनेन नोः उकारस्य गुणे ओकारे अवादेशे सुन् अव् आ ऐ इति जाते आटश्च इति योगेन आ ऐ इत्यनयोः स्थाने वृद्धौ एकादेशे ऐकारे सुनो ऐ इति जाते ओकारस्य स्थाने अवादेशे **सुनवै** इति रूपम्। वहौ महिङि च एवमेव प्रक्रिया।

तथा हि लोटि आत्मनेपदे रूपाणि - **सुनुताम्, सुन्वाताम्, सुन्वताम्। सुनुष्व, सुन्वाथाम्, सुनुध्वम्। सुनवै, सुनवावहै, सुनवामहै**।

लङि अटि प्रथमपुरुषैकवचने तिपि श्नुप्रत्यये इकारलोपे तिपः सार्वधातुकत्वात् नोः उकारस्य गुणे **असुनोत्** इति रूपं भवति। एवम् सिपि मिपि च गुणः। तसादौ सार्वधातुकमपित् इति ङिद्वद्भावात् न नोः उकारस्य गुणः। वसि मसि च लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन नोः उकारस्य विकल्पेन लोपः।

तथा च परस्मैपदे रूपाणि - **असुनोत्, असुनुताम्, असुन्वन्। असुनोः, असुनुतम्, असुनुत। असुनवम्, असुन्व-असुनुव, असुन्म-असुनुम**।

आत्मनेपदस्थले तप्रत्ययादेः सार्वधातुकमपित् इति अपित्त्वात् ङिद्वद्भावे गुणाभावः। सोः झे प्रक्रियया अ सुनु झ इति स्थिते आत्मनेपदेष्वनतः इति झस्य अत् इत्यादेशे अ सुनु अत् अ इति जाते हुश्नुवोः सार्वधातुके इति नोः उकारस्य स्थाने यणि वकारे **असुन्वत** इति रूपम्। वहिप्रत्यये महिङ्प्रत्यये च लोपश्चास्यान्यतरस्यां म्वोः इत्यनेन नोः उकारस्य विकल्पेन लोपः। लङि आत्मनेपदे झे, आतामि, आथामि, झे, इटि च परतः हुश्नुवोः सार्वधातुके इत्यनेन नोः उकारस्य स्थाने वकारादेशः।

तथा च आत्मनेपदे रूपाणि - **असुनुत, असुन्वाताम्, असुन्वत। असुनुथाः, असुन्वाथाम्, असुनुध्वम्। असुन्वि, असुन्वहि-असुनुवहि, असुन्महि-असुनुमहि**।

विधिलिङि तिपि श्नुप्रत्यये इकारलोपे यासुटि सुटि सु नु यास् स् त् इति जाते लिङः स लोपोऽनन्त्यस्य इत्यनेन सकारद्वयस्यापि लोपे **सुनुयात्** इति रूपं जायते। तसादौ रूपाणि स्वयं बोद्धव्यानि।

तथा हि **विधिलिङि** परस्मैपदे रूपाणि - **सुनुयात्, सुनुयाताम्, सुनुयुः। सुनुयाः, सुनुयातम्, सुनुयात। सुनुयाम्, सुनुयाव, सुनुयाम**।

विधिलिङि आत्मनेपदस्थले प्रथमैकवचने तप्रत्यये श्नुप्रत्यये लिङः सीयुट् इत्यनेन सीयुडागमे सुटि सु नु सीय् स् त इति जाते लिङः सलोपोऽनन्त्यस्य इत्यनेन सीयुटः सकारलोपे सुटः च सकारलोपे सु नु ईय् त इति जाते हुश्नुवोः सार्वधातुके इत्यनेन नोः उकारस्य स्थाने यणि वकारे लोपो व्योर्वलि इत्यनेन यकारस्य लोपे **सुन्वीत** इति रूपं भवति। एवम् अग्रेऽपि ऊह्यम्। आत्मनेपदस्थले सर्वत्रैव अजादिसार्वधातुकपरत्वात् हुश्नुवोः सार्वधातुके इति यणि वकारे सुन्वी इति भवति।

तथा हि विधिलिङि आत्मनेपदे रूपाणि - **सुन्वीत, सुन्वीयाताम्, सुन्वीरन्। सुन्वीथाः, सुन्वीयाथाम्, सुन्वीध्वम्। सुन्वीय, सुन्वीवहि, सुन्वीमहि।**

आशीर्लिङः आर्धधातुकत्वात् न श्नुप्रत्ययः। अकृत्सार्वधातुकयोर्दीर्घः इत्यनेन दीर्घः। हुधातुवत् रूपाणि साध्यन्ताम्। तथा च परस्मैपदे रूपाणि - **सूयात्, सूयास्ताम्, सूयासुः। सूयाः, सूयास्तम्, सूयास्त। सूयासम्, सूयास्व, सूयास्म।**

आत्मनेपदस्थले तप्रत्यये सीयुटि सुटि सु सीय् स् त इति जायते। यदागमपरिभाषया अत्र सीय् स् त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय् स् त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति तन्निषेधः। ततः लोपो व्योर्वलि इति यकारलोपे आशीर्लिङः आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे ओकारे षत्वे तकारस्य ष्टुत्वे टकारे **सोषीष्ट** इति रूपम्। थासि एवमेव प्रक्रिया। ध्वमि विभाषेटः इति ध्वमः धकारस्य विकल्पनेन ढकारः। अत्र सर्वत्र आदेशप्रत्यययोः इति सीयुटः सकारस्य षत्वम्। उत्तमपुरुषैकवचने इटि सोषीय् इ इति स्थिते इटोऽत् इति इकारस्य अत्त्वे सोषीय् अ इति जाते वर्णसम्मेलने **सोषीय** इति रूपम्।

तथा हि आत्मनेपदे आशीर्लिङि रूपाणि - **सोषीष्ट, सोषीयास्ताम्, सोषीरन्। सोषीष्ठाः, सोषीयास्थाम्, सोषीढ्वम्। सोषीय, सोषीवहि, सोषीमहि।**

लुङि अटि प्रथमपुरुषैकवचने तिपि श्नुप्रत्ययापवादे च्लौ सिचि तिपः इकारलोपे अ सु स् त् इति जाते अस्तिसिचोऽपृक्ते इत्यनेन ईडागमे अ सु स् ई त् इति जाते सिचः आर्धधातुकत्वात् वलादित्वात् च आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधे सूत्रमिदमारभ्यते -

[२२.५] स्तुसुधूञ्भ्यः परस्मैपदेषु॥ (७.२.७२)

सूत्रार्थः - स्तुसुधूञ्भ्यः सिच इट् स्यात् परस्मैपदेषु।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। स्तुसुधुञ्भ्यः (५/३), परस्मैपदेषु (७/३) इति सूत्रगतपदच्छेदः। स्तुश्च सुश्च धूञ् च तेषामितरेतरयोगद्वन्द्वः, तेभ्यः स्तुसुधूञ्भ्यः। अञ्जेः सिचि इत्यतः सिचि (७/१) इत्यनुवर्तते तस्य च षष्ठ्येकवचनान्ततया विपरिणामः। इडत्त्यर्तिव्ययतीनाम् इत्यतः इट् (१/१) इत्यनुवर्तते। स्तुसुधूञ्भ्यः इति पञ्चम्यन्तम् अतः तस्मादित्युत्तरस्य इति परिभाषया उत्तरस्य इत्यर्थलाभः। सूत्रार्थस्तावत् - परस्मैपदस्थले स्तु, सु, धूञ् इत्येतेभ्यः धातुभ्यः उत्तरस्य सिच इडागमः स्यात्। सुस्तुधात्वोः अनिट्त्वात् आभ्याम् धातुभ्याम् परस्य सिचः इण्निषेधः प्राप्तः। अपि च स्वरतिसूतिसूयतिधूञूदितो वा इति योगेन धूञ्धातोः परस्य सिचः विकल्पेन इडागमः प्राप्तः। अतः निषेधविकल्पौ बाधित्वा सिचः नित्यम् इड्विधानार्थः प्रकृतसूत्रारम्भः। टित्वात् इट् सिचः आद्यावयवो भवति आद्यन्तौ टकितौ इति परिभाषया।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण सुधातोः लुङि तिपि अ सु स् ई त् इति जाते परस्मैपदस्थलत्वात् प्रकृतसूत्रेण सिचः इडागमः। ततः अ सु इ स् ईत् इति जाते सिचि वृद्धिः परस्मैपदेषु इत्यनेन सोः उकारस्य वृद्धौ औकारे आवादेशे अ साव् इ स् ईत् इति जाते इट ईटि इत्यनेन सकारस्य लोपे सवर्णदीर्घे **असावीत्** इति रूपं भवति। सिपि अपि एवमेव प्रक्रिया। परस्मैपदस्थले सर्वत्रैव इगन्ताङ्गत्वात् सिचिः वृद्धिः परस्मैपदेषु इति वृद्धिः बोद्धव्या। तसि थसि थे च ष्टुना ष्टुः इति ष्टुत्वम् बोध्यम्। वसि मसि च नित्यं ङितः इति सकारलोपः।

तथा हि परस्मैपदे रूपाणि - **असावीत्, असाविष्टाम्, असाविषुः। असावीः, असाविष्टम्, असाविष्ट। असाविषम्, असाविष्व, असाविष्म।**

आत्मनेपदसंज्ञकतप्रत्ययस्थले लुङि अटि तप्रत्यये श्नुप्रत्ययापवादे च्लौ सिचि अ सु स् त इति जाते सिचः आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे ओकारे सिचः सकारस्य षत्वे तकारस्य ष्टुत्वे टकारे **असोष्ट** इति रूपम्। एवमेव थासि ऊह्यम्। सोः झप्रत्यये प्रक्रियया अ सु स् झ इति जाते आत्मनेपदेष्वनतः इति झस्य अत् इत्यादेशे अ सु स् अत् अ इति जाते सोः उकारस्य गुणे ओकारे सिचः सस्य षत्वे **असोषत** इति रूपम् सिध्यति। ध्वमि इणः षीध्वंलुङ्लिटां धोऽङ्गात् इति ध्वमः धकारस्य ढत्वम्।

तथा च आत्मनेपदे रूपाणि - **असोष्ट, असोषाताम्, असोषत। असोष्ठाः, असोषाथाम्, असोढ्वम्। असोषि, असोष्वहि, असोष्महि।**

{सूत्रम्. **इणः षीध्वंलुङ्लिटां धोऽङ्गात्** (८.३.७८) = इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः स्यात्।}

लृङि अटि तिपि इकारलोपे श्नुप्रत्ययापवादभूते स्यप्रत्यये स्यस्य आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे ओकारे सस्य षत्वे **असोष्यत्** इति रूपं भवति। लृङि उभयविधस्थले सर्वत्रैव आदेशप्रत्यययोः इति षत्वम्। उत्तमपुरुषैकवचने असोष्य अम् इति स्थिते अमि पूर्वः इति पूर्वरूपैकादेशे **असोष्यम्** इति रूपम्। वसि मसि च नित्यं ङितः इति सकारलोपः। श्नुप्रत्ययापवादस्य स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः।

तथा हि लृङि परस्मैपदे रूपाणि - **असोष्यत्, असोष्यताम्, असोष्यन्। असोष्यः, असोष्यतम्, असोष्यत। असोष्यम्, असोष्याव, असोष्याम।**

लृङि आत्मनेपदस्थले पूर्ववत् प्रक्रिया। तथा च आत्मनेपदे रूपाणि - **असोष्यत, असोष्येताम्, असोष्यन्त। असोष्यथाः, असोष्येथाम्, असोष्यध्वम्। असोष्ये, असोष्यावहि, असोष्यामहि।**

।।इति स्वादिगणः।।

पाठगतप्रश्नाः-१

१. स्वादिगणीयधातुभ्यः कः विकरणप्रत्ययो विधीयते।

२. स्तुसुधूञ्भ्यः परस्मैपदेषु इति सूत्रं किं विदधाति।

३. सुधातोः श्नुप्रत्ययविधायकसूत्रं किम्।

४. स्वादिगणीयस्य सुधातोः कोऽर्थः।

५. सुधातोः परस्मैपदे लुङि प्रथमपुरुषैकवचने किं रूपम्।

६. सुधातोः आत्मनेपदे लटि उत्तमपुरुषबहुवचने किं रूपम्।

७. सुधातोः परस्मैपदे लिटि मध्यमपुरुषैकवचने किं रूपम्।

८. श्नुप्रत्ययस्य शकारस्य इत्संज्ञायाः किं प्रयोजनम्।

९. आशीर्लिङि किमर्थं श्नुप्रत्ययः न भवति।

१०. सूयात् इत्यत्र सोः उकारस्य दीर्घः केन सूत्रेण।

अथ तुदादिगणः

तुद व्यथने इति स्वरितेतः अनिटः तुदादिगणीयधातोः वर्तमानक्रियावृत्तित्वविवक्षायाम् कर्तरि **लटि** परस्मैपदसंज्ञके तिपि तुद् ति इति जाते तिपः सार्वधातुकत्वात् कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदमारभ्यते -

[२२.६] तुदादिभ्यः शः॥ (३.१.७७)

सूत्रार्थः - तुदादिगणपठितधातुभ्यः शप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। तुदादिभ्यः (५/३), शः (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिकृतम्। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः शः प्रत्ययः परः इति। तुदादिगणः दशसु धातुगणेषु षष्ठः। तुद् आदिः येषाम् (धातूनाम्) ते तुदादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः तुदादिभ्यः। सूत्रार्थस्तावत् - कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये

परतः तुदादिगणपठितधातुभ्यः शप्रत्ययः परो भवति। लशक्वतद्धिते इत्यनेन शप्रत्ययस्य शकारस्य इत्संज्ञा भवति। अतः अ-मात्रम् शिष्यते। शप्रत्ययस्य शित्त्वात् तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञा। किञ्च सार्वधातुकसंज्ञकस्य अस्य शप्रत्ययस्य अपित्त्वात् सार्वधातुकमपित् इत्यनेन ङिद्वद्भावः। यस्य फलम् अस्ति गुणनिषेधः। शप्प्रत्ययः पित् भवति, शप्रत्ययः अपित् भवति इति शप्-शयोः पार्थक्यम्। शपः पित्त्वात् अनुदात्तौ सुप्पितौ इति अनुदात्तस्वरः। शे तु आद्युदात्तश्च इति उदात्तस्वरः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण तुद् ति इति जाते तुदादिभ्यः शः (३.१.७७) इति शबपवादस्य शप्रत्ययस्य प्राप्तिः। किञ्च पुगन्तलघूपधस्य च (७.३.८६) इति लघूपधगुणस्य प्राप्तिः इत्युभयोः युगपत् प्राप्तौ परत्वात् लघूपधगुणः प्राप्तः। तदा गुणे कृते अकृते च शस्य प्राप्तत्वात् कृताकृप्रसङ्गी नित्यः इति परिभाषया शः नित्यः। किन्तु शप्रत्यये कृते तस्य अपित्त्वात् सार्वधातुकत्वात् च सार्वधातुकमपित् इति ङिद्वद्भावात् परोऽपि लघूपधगुणो न प्रवर्तते क्ङिति च इति निषेधात्। अतः परान्नित्यं बलवत् इति परिभाषया आदौ शप्रत्यये कृते न लघूपधगुणस्य प्राप्तिः। एवञ्च शप्रत्यये अनुबन्धलोपे तुद् अ ति इति जाते वर्णसम्मेलने च **तुदति** इति रूपं सिध्यति। एवम् तसादौ अपि।

तथा हि लटि परस्मैपदे रूपाणि - **तुदति, तुदतः, तुदन्ति। तुदसि, तुदथः, तुदथ। तुदामि, तुदावः, तुदामः**।

अत्र अवधेयम् - तुद् धातोः स्वरितेत्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे तुदः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इति परस्मैपदप्रत्ययो भवति।

आत्मनेपदस्थले शप्रत्ययस्य सार्वधातुकसंज्ञकत्वात् अपित्त्वात् च सार्वधातुकमपित् इति ङिद्वद्भावे पुगन्तलघूपधस्य च इति प्राप्तस्य लघूपधगुणस्य क्ङिति च इति निषेधः। किञ्च तादीनाम् नवानाम् अपित्त्वात् सार्वधातुकत्वात् च सार्वधातुकमपित् इति ङिद्वद्भावः। तुदः आतामि ङिद्वद्भावे आतामः आकारस्य इयादेशे यकारलोपे तुद् अ इ ताम् इति स्थितौ आद्गुणः इति गुणैकादेशे एकारे तुद् ए ताम् इति जाते टेः आमः एत्वे **तुदेते** इति रूपम् सिध्यति। आथामि एवमेव। तुदः थासि शे टित आत्मनेपदानां टेरे इति सूत्रापवादेन थासः से इति सूत्रेण थासः स्थाने से इत्यादेशः। उत्तमपुरुषैकवचने इटि इकारे शे टिसंज्ञकस्य इकारस्य एत्वे तुद् अ ए इति जाते अतो गुणे इति पररूपैकादेशः। तुदः वहौ महिङि च शविकरणप्रत्यये अतो दीर्घो यञि इति दीर्घैकादेशः। थासम् विना अन्यत्र टित आत्मनेपदानां टेरे इति एत्वम् बोध्यम्।

तथा च आत्मनेपदे लटि रूपाणि - **तुदते, तुदेते, तुदन्ते। तुदसे, तुदेथे, तुदध्वे। तुदे, तुदावहे, तुदामहे**।

लिटि णलि (तिपि), थलि (सिपि), णलि (मिपि) च द्वित्वे हलादिशेषे लघूपधगुणः। अन्यत्र लिटः आर्धधातुकत्वात् सार्वधातुकमपित् इति न प्रवर्तते। किन्तु असंयोगाल्लिट् कित् (१.२.५) इति कित्त्वात् क्ङिति च लघूपधगुणनिषेधः। थलि आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच

उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधे क्रादिनियमानुसारम् थलि नित्यम् इडागमः। तेन थल्यादौ आर्धधातुकस्येड्वलादेः इत्यनेन इडागमो भवत्येव। आत्मनेपदस्थलेऽपि क्रादिनियमानुसारम् इडागमः।

तथा च परस्मैपदे लिटि रूपाणि - **तुतोद, तुतुदतुः, तुतुदुः। तुतोदिथ, तुतुदथुः, तुतुद। तुतोद, तुतुदिव, तुतुदिम**।

आत्मनेपदस्थले तुदः लिटि तप्रत्यये लिटस्तझयोरेशिरेच् इत्यनेन तकारस्य स्थाने एशादेशे तुद् ए इति जाते लिटि धातोरनभ्यासस्य इत्यनेन तुद् इत्यस्य द्वित्वे हलादिशेषे तु तुद् ए इति जाते वर्णसम्मेलने **तुतुदे** इति रूपं सिध्यति। आतामादौ रूपाणि स्वयं साध्यन्ताम्। थासि, ध्वमि, वहौ, महिङि च पूर्ववत् इडागमः। तं, थासं झं च विहाय अन्यत्र टित आत्मनेपदानां टेरे इति एत्वम् बोध्यम्।

तथा हि लिटि आत्मनेपदे रूपाणि - **तुतुदे, तुतुदाते, तुतुदिरे। तुतुदिषे, तुतुदाथे, तुतुदिध्वे। तुतुदे, तुतुदिवहे, तुतुदिमहे**।

{सूत्रम्. **असंयोगाल्लिट् कित्** (१.२.५) = असंयोगात्परोऽपिल्लिट् कित् स्यात्।}

लुटि इण्निषेधः। प्रथमपुरुषैकवचने तिपि शप्रत्ययापवादे तासि डित्त्वसामर्थ्यात् अभस्यापि टेः आसः लोपे तासः आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन तुदः उकारस्य गुणे ओकारे तोद् त् आ इति जायते। ततः खरि च इति योगेन तासः तकारे परतः तुदः दकारस्य चर्त्वे तकारे **तोत्ता** इति रूपं सिध्यति। तासः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः। एवम् अग्रेऽपि ऊह्यम्। अत्र प्रक्रियायै भूधातुरूपाणि दृश्यन्ताम्।

तथा च परस्मैपदे लटि रूपाणि - **तोत्ता, तोत्तारौ, तोत्तारः। तोत्तासि, तोत्तास्थः, तोत्तास्थ। तोत्तास्मि, तोत्तास्वः, तोत्तास्मः**।

आत्मनेपदस्थलेऽपि पूर्ववत् प्रक्रिया। अत्र रूपाणाम् प्रक्रियायै एध्धातुरूपाणि अवलोक्यन्ताम्। तथा च आत्मनेपदे रूपाणि - **तोत्ता, तोत्तारौ, तोत्तारः। तोत्तासे, तोत्तासाथे, तोत्ताध्वे। तोत्ताहे, तोत्तास्वहे, तोत्तास्महे**।

लृटि प्रथमपुरुषैकवचने तिपि शप्रत्ययापवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् पुगन्तलघूपधस्य च इति लघूपधगुणे खरि च इति दकारस्य चर्त्वे तकारे **तोत्स्यति** इति रूपं सिध्यति। स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः। एवम् अन्यत्रापि विद्यार्थिना ऊह्यम्।

एवञ्च परस्मैपदे लृटि रूपाणि - **तोत्स्यति, तोत्स्यतः, तोत्स्यन्ति। तोत्स्यसि, तोत्स्यथः, तोत्स्यथ। तोत्स्यामि, तोत्स्यावः, तोत्स्यामः**।

आत्मनेपदस्थलेऽपि पूर्ववत् प्रक्रिया। थासं विना सर्वत्रैव टेः एत्वम्। तथा हि आत्मनेपदे रूपाणि - **तोत्स्यते, तोत्स्येते, तोत्स्यन्ते। तोत्स्यसे, तोत्स्येथे, तोत्स्यध्वे। तोत्स्ये, तोत्स्यावहे, तोत्स्यामहे**।

लोटि उभयविधस्थलेऽपि न कश्चित् विशेषः। तथा च परस्मैपदे रूपाणि - **तुदतु - (तातङि) तुदतात्, तुदताम्, तुदन्तु। तुद - (तातङि) तुदतात्, तुदतम्, तुदत। तुदानि, तुदाव, तुदाम**।

आत्मनेपदे एध्-धातुवत् प्रक्रिया ज्ञेया। तथा च रूपाणि - **तुदताम्, तुदेताम्, तुदन्ताम्। तुदस्व, तुदेथाम्, तुदध्वम्। तुदै, तुदावहै, तुदामहै**।

लङि अटि तिपि शप्रत्यये इकारलोपे **अतुदत्** इति रूपं सिध्यति। शप्रत्ययस्य सार्वधातुकमपित् इति ङिद्वद्भावात् न लघूपधगुणः। दशमकक्षायाः सन्धिप्रकरणे अधीताः केचित् योगाः अत्र प्रवर्तन्ते। तथाहि - अतुदत् इति तिङन्तत्वात् पदम्। झलां जशोऽन्ते इति सूत्रेण अन्त्यस्य तकारस्य स्थाने स्थानत आन्तर्याद् जश्त्वे दकारे अतुदद् इति स्थितिः जायते। ततश्च वाऽवसाने इति सूत्रेण विकल्पेन चर्त्वे तकारे कृते अतुदत् इत्यपि शब्दः निष्पद्यते। इत्थम् **अतुदद् अतुदत्** इति द्विविधमपि रूपं साधु। एवमन्यत्रापि विद्यार्थिना स्वयमूह्यम्।

तथा च लङि परस्मैपदे रूपाणि- **अतुदत्, अतुदताम्, अतुदन्। अतुदः, अतुदतम्, अतुदत। अतुदम्, अतुदाव, अतुदाम।**

आत्मनेपदस्थलेऽपि पूर्ववत् लघूपधगुणनिषेधः। तथा च आत्मनेपदे रूपाणि - **अतुदत, अतुदेताम्, अतुदन्त। अतुदथाः, अतुदेथाम्, अतुदध्वम्। अतुदे, अतुदावहि, अतुदामहि।**

विधिलिङि तिपि शप्रत्यये यासुटि सुटि इकारलोपे तुद् अ यास् स् त् इति जाते सकारद्वयलोपे अते येयः इत्यनेन या इत्यस्य स्थाने तुद् अ इय् त् इति जाते लोपो व्योर्वलि इत्यनेन यकारस्य लोपे आद्गुणः इति अकार-इकारयोः स्थाने गुणे एकारे **तुदेत्** इति रूपं जायते। अत्र न कश्चित् विशेषः। अन्येषां प्रक्रियायै भूधातुरूपाणि वीक्ष्यन्ताम्।

तथा च परस्मैपदे रूपाणि - **तुदेत्, तुदेताम्, तुदेयुः। तुदेः, तुदेतम्, तुदेत। तुदेयम्, तुदेव, तुदेम**। आत्मनेपदे च एध्धातुवत् रूपाणि - **तुदेत, तुदेयाताम्, तुदेरन्। तुदेथाः, तुदेयाथाम्, तुदेध्वम्। तुदेय, तुदेवहि,तुदेमहि।**

आशीर्लिङः लिङाशिषि इत्यनेन आर्धधातुकत्वात् न शप्रत्ययस्य प्रवृत्तिः। प्रथमैकवचने तिपि यासुटि सुटि इकारलोपे तुद् यास् स् त् इति जाते स्कोः संयोगाद्योरन्ते च इत्यनेन सकारद्वयस्यापि लोपे तुद् यात् इति स्थितौ आर्धधातुकत्वात् गुणः प्राप्तः। तदा किदाशिषि इति सूत्रेण यासुटः कित्त्वात् यात् इति समुदायस्यापि कित्त्वं भवति इति कृत्वा क्ङिति च इति गुणनिषेधः। तेन **तुद्यात्** इति रूपम् सिध्यति। सिपि तुद्यास् स् इति जाते यासुटः सकारस्य स्कोः संयोगाद्योरन्ते च इत्यनेन लोपः। सिपः सस्य तु रुत्वे विसर्गे **तुद्याः** इति रूपम्। एवमेव अग्रेऽपि स्वयम् ऊह्यम्।

तथा हि आशीर्लिङि परस्मैपदे रूपाणि - **तुद्यात्, तुद्यास्ताम्, तुद्यासुः। तुद्याः, तुद्यास्तम्, तुद्यास्त। तुद्यासम्, तुद्यास्व, तुद्यास्म।**

आत्मनेपदस्थलेऽपि न शप्रत्ययस्य प्राप्तिः आशीर्लिङः आर्धधातुकत्वात्। एवञ्च तप्रत्यये सीयुटि सुटि तुद् सीय् स् त इति जायते। यदागमपरिभाषया अत्र सीय् स् त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय् स्त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति

तन्निषेधः। ततः लोपो व्योर्वलि इत्यनेन यकारस्य लोपे आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन तुदः उकारस्य गुणे प्राप्ते सूत्रमिदमारभ्यते -

[२२.७] लिङ्सिचावात्मनेपदेषु॥ (१.२.११)

सूत्रार्थः - इक्समीपाद्धलः परौ झलादिलिङात्मनेपदपरः सिच्चेत्येतौ कितौ स्तः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। लिङ्सिचौ (१/२), आत्मनेपदेषु (७/३) इति सूत्रगतपदच्छेदः। लिङ् च सिच् च तयोः इतरेतरयोगद्वन्द्वे लिङ्सिचौ इति। इको झल् इत्यतः झल् (१/१), हलन्ताच्च इत्यतः हलन्तात् (५/१), असंयोगाल्लिट् कित् इत्यतः कित् (१/१) इत्येतेषां पदानाम् अनुवृत्तिर्भवति। झल् इति लिङ्सिचौ इत्यस्य विशेषणं भवति, हलन्तात् इत्यत्र अन्तपदस्य समीपम् इत्यर्थः। तेन हलन्तात् इत्यस्य हलः समीपात् इत्यर्थः। सूत्रार्थस्तावत् - इकः समीपे यो हल् वर्तते तस्मात् परं झलादिलिङ् झलादिसिच् च किद्वद् भवति आत्मनेपदप्रत्यये परतः इति।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण तुद् सीय् त इति स्थिते आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन प्राप्तस्य गुणस्य क्ङिति च इत्यनेन निषेधः। यतो हि लिङ्सिचावात्मनेपदेषु इति प्रकृतसूत्रेण सागमकस्य तप्रत्ययस्य कित्त्वं विधीयते, झलादिलिङ्त्वात्। ततः लोपो व्योर्वलि इति यकारलोपे सुडागमे षत्वे ष्टुत्वे टकारे तुत्सीष्ट इति रूपं भवति। एवम् अन्यत्रापि स्वयं बोद्धव्यम्।

तथा च आशीर्लिङि आत्मनेपदे रूपाणि - **तुत्सीष्ट, तुत्सीयास्ताम्, तुत्सीरन्। तुत्सीष्ठाः, तुत्सीयास्थाम्, तुत्सीध्वम्। तुत्सीय, तुत्सीवहि, तुत्सीमहि।**

लुङि तुदः अटि तिपि शप्रत्ययापवादे च्लौ सिचि इकारलोपे अतुद् स् त् इति जाते सिचः आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इत्यनेन प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इत्यनेन निषेधे अस्तिसिचोऽपृक्ते इत्यनेन ईडागमे अतुद् स् ईत् इति जाते वदव्रजहलन्तस्याचः इत्यनेन तुदः उकारस्य वृद्धौ औकारे खरि च इति दकारस्य चर्त्वे **अतौत्सीत्** इति रूपं सिध्यति। तसि तसः तामादेशे च्लौ सिचि अतुद् स् ताम् इति जाते वदव्रजहलन्तस्याचः इत्यनेन तुदः उकारस्य वृद्धौ अतौद् स् ताम् इति जायते। ततः सकारस्य झलो झलि इत्यनेन सकारस्य लोपे खरि च इत्यनेन दकारस्य चर्त्वे तकारे वर्णसम्मेलने **अतौत्ताम्** इति रूपं भवति। तामि, तमि, ते, थासि, ध्वमि च सकारस्य झलो झलि इति लोपः।

तथा हि लुङि परस्मैपदे रूपाणि - **अतौत्सीत्, अतौत्ताम्, अतौत्सुः। अतौत्सीः, अतौत्तम्, अतौत्त। अतौत्सम्, अतौत्स्व, अतौत्स्म।**

वदव्रजहलन्तस्याचः इति सूत्रं परस्मैपदस्थले प्रवर्तते इत्यतः आत्मनेपदस्थले न वृद्धिः। किञ्च लिङ्सिचावात्मनेपदेषु इति सूत्रेण सिचः कित्त्वात् लघूपधगुणनिषेधः। तेन न गुणवृद्धी स्तः। तथा च आत्मनेपदे रूपाणि - **अतुत्त, अतुत्साताम्, अतुत्सत। अतुत्थाः, अतुत्साथाम्, अतुद्ध्वम्। अतुत्सि, अतुत्स्वहि, अतुत्स्महि।**

लृङि अटि तिपि शप्रत्ययापवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन लघूपधगुणे ओकारे खरि च इति चर्त्वे तिपः इकारलोपे **अतोत्स्यत्** इति रूपं भवति। स्यस्य आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इति इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः। एवम् अन्यत्रापि विद्यार्थिना ऊह्यम्।

एवञ्च परस्मैपदे रूपाणि तावत् - **अतोत्स्यत्, अतोत्स्यताम्, अतोत्स्यन्। अतोत्स्यः, अतोत्स्यतम्, अतोत्स्यत। अतोत्स्यम्, अतोत्स्याव, अतोत्स्याम।**

आत्मनेपदस्थले न कश्चित् विशेषः। रूपाणां प्रक्रियायै एध्धातुरूपाणि द्रष्टुम् शक्यानि। तथा च आत्मनेपदे रूपाणि - **अतोत्स्यत, अतोत्स्येताम्, अतोत्स्यन्त। अतोत्स्यथाः, अतोत्स्येथाम्, अतोत्स्यध्वम्। अतोत्स्ये, अतोत्स्यावहि, अतोत्स्यामहि।**

।।इति तुदादिगणः।।

पाठगतप्रश्नाः-२

११. तुदादिगणीयधातुभ्यः कः विकरणप्रत्ययो विधीयते।

१२. लिङ्सिचावात्मनेपदेषु इति सूत्रस्य कोऽर्थः।

१३. तुद्-धातोः शप्रत्ययविधायकसूत्रं किम्।

१४. तुद्-धातोः कोऽर्थः।

१५. तुद्-धातोः लुङि तिपि किम् रूपम्।

१६. तुद्-धातोः आत्मनेपदे आशीर्लिङि मध्यमपुरुषैकवचने किम् रूपम्।

१७. तुद्-धातोः आत्मनेपदे लिटि मध्यमपुरुषबहुवचने किम् रूपम्।

१८. शप्रत्ययस्य शकारस्य इत्संज्ञायाः किं प्रयोजनम्।

१९. तुदः आशीर्लिङि तप्रत्यये किं रूपम्।

२०. तुदति इत्यत्र लघूपधगुणो कुतो न।

अथ रुधादिगणः

(रुधिँर् आवरणे इति धातोः इर इत्संज्ञा वाच्या इति वार्तिकेन इरः इत्संज्ञायां तस्य लोपः इत्यनेन तस्य लोपे रुध् इत्येव शिष्यते। इरितः प्रयोजनम् इरितो वा इति सूत्रेण लुङि विकल्पेन अङ्विधानम्।) रुधिर् आवरणे इति स्वरितेतः उभयपदिनः अनिटः सकर्मकात् इरितः रुधादिगणीयात्

धातोः वर्तमानक्रियावृत्तित्वविवक्षायां **लटि** परस्मैपदसंज्ञके तिपि अनुबन्धलोपे रुध् ति इति जाते कर्तरि शप् इत्यनेन शपि प्राप्ते सूत्रमिदं प्रारभ्यते -

[२२.८] रुधादिभ्यः श्नम्॥ (३.१.७८)

सूत्रार्थः - रुधादिगणपठितधातुभ्यः श्नम्-प्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। रुधादिभ्यः (५/३), श्नम् (१/१) इति सूत्रगतपदच्छेदः। कर्तरि शप् इत्यतः कर्तरि (७/१) इति पदं, सार्वधातुके यक् इत्यतः सार्वधातुके (७/१) इति पदं च अनुवर्तते। प्रत्ययः (१/१), परः (१/१) इत्युभयमपि अधिक्रियते। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रात् धातोः इति पदम् अनुवर्तते। पदयोजना - कर्तरि सार्वधातुके धातोः श्नम् प्रत्ययः परः इति। रुधादिगणः दशसु धातुगणेषु सप्तमः। रुध् आदिः येषाम् (धातूनाम्) ते रुधादयः (धातवः) इति तद्गुणसंविज्ञानबहुव्रीहिसमासः, तेभ्यः रुधादिभ्यः। सूत्रार्थस्तावत् - कर्त्रर्थके सार्वधातुकसंज्ञकप्रत्यये परतः रुधादिगणपठितधातुभ्यः श्नम्प्रत्ययः परो भवति। श्नम्प्रत्ययस्य शकारस्य इत्संज्ञा लशक्वतद्धिते इत्यनेन भवति। मकारश्च हलन्त्यम् इत्यनेन इतसंज्ञकः। अतः न इत्येव शिष्यते। श्नमः शित्त्वात् सार्वधातुकत्वे सार्वधातुकमपित् इति (गुणवृद्धिनिषेधाय) ङिद्वद्भावे सत्यपि नैतद् शित्करणस्य प्रयोजनम्। यतः गुणवृद्धिप्रसक्तिरेव नास्ति। कारणं हि श्नम् मित्त्वात् मिदचोऽन्त्यात्परः इति परिभाषया अन्त्याद् अचः परो भवति। अतः श्नमि सति नैव कुत्रचित् इगन्ताङ्गम् लभ्यते येन गुणवृद्धिप्रसक्तिः स्यात्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण रुध् ति इति जाते रुधादिभ्यः श्नम् (३.१.७८) इति शबपवादस्य श्नम्-प्रत्ययस्य प्राप्तिः। किञ्च पुगन्तलघूपधस्य च (७.३.८६) इति लघूपधगुणस्य प्राप्तिः इत्युभयोः युगपत् प्राप्तौ परत्वात् लघूपधगुणः प्राप्तः। तदा गुणे कृते अकृते च शस्य प्राप्तत्वात् कृताकृतप्रसङ्गी नित्यः इति परिभाषया श्नम् नित्यः। किन्तु श्नमि कृते सति लघूपधत्वाभावात् न गुणप्रसक्तिः। तस्मात् रुधादिभ्यः श्नम् इत्यनेन शप्प्रत्ययापवादः श्नम्-प्रत्ययो भवति। स च श्नम् मित्त्वात् मिदचोऽन्त्यात्परः इति परिभाषया अन्त्याद् अचः परो भवति। तेन रु न ध् ति इति जाते अग्रिमसूत्रमारभ्यते -

[२२.९] झषस्तथोर्धोऽधः॥ (८.२.४०)

सूत्रार्थः - झषः परयोस्तथोर्धः स्यान्न तु दधातेः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् चत्वारि पदानि सन्ति। झषः (५/१), तथोः (६/२), धः (१/१), अधः (५/१) इति सूत्रगतपदच्छेदः। धः इत्यत्र धकारात् अकारः उच्चारणार्थः। न धाः अधाः तस्मात् अधः इति विश्वपः इति शब्दवत्। झष् इति प्रत्याहारः। एवञ्च झष्प्रत्याहारस्थवर्णात् परयोः तकारथकारयोः स्थाने धकारादेशो भवति धा-धातुं विना इति सूत्रार्थः।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण रु न ध् ति इति जाते तेः पूर्वम् यः धकारः अस्ति सः झष्प्रत्याहारस्थवर्णः। किञ्च तस्मात् धकारात् परम् तेः तकारः अस्ति इति कृत्वा प्रकृतसूत्रेण

तकारस्य स्थाने धकारादेशो भवति। ततः झलां जश् झशि इत्यनेन धातोः धकारस्य जश्त्वे दकारे अट्कुप्वाङ्नुम्व्यवायेऽपि इत्यनेन नकारस्य णत्वे **रुणद्धि** इति रूपं सिध्यति।

तसि श्नमि रु न ध् तस् इति जाते तसः अपित्त्वात् सार्वधातुकमपित् इत्यनेन तसः ङिद्वद्भावे सूत्रमिदमारभ्यते -

[२२.१०] श्नसोरल्लोपः॥ (६.४.१११)

सूत्रार्थः - श्नस्यास्तेश्चाकारस्य लोपः स्यात् सार्वधातुके क्ङिति।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। श्नसोः (६/२), अल्लोपः (१/१) इति द्विपदं सूत्रम्। श्नश्च अस् च तयोरितरेतरयोगद्वन्द्वः श्नसौ (शकन्ध्वादिपररूपम्)। अतः लोपः अल्लोपः इति षष्ठीतत्पुरुषसमासः। सूत्रेऽस्मिन् अत उत्सार्वधातुके इत्यतः सार्वधातुके इत्यस्य, गमहनजनखनघसां लोपः क्ङित्यनङि इत्यतः क्ङिति इत्यस्य च अनुवृत्तिर्भवति। सार्वधातुके किति ङिति च परतः श्नस्य असः च अतः लोपो भवति इति सूत्रार्थः। श्न इति श्नम्-प्रत्ययैकदेशस्य ग्रहणम्।

उदाहरणे सूत्रार्थसमन्वयः - पूर्वोक्तप्रकारेण रुध्-धातोः तसि तसः सार्वधातुकत्वात् ङित्वात् च श्नसोरल्लोपः इत्यनेन श्नमः अकारस्य लोपे रुन् ध् तस् इति जाते झषस्तथोर्धोऽधः इत्यनेन तसः तकारस्य धकारे रुन् ध् धस् इति जाते झरो झरि सवर्णे इत्यनेन विकल्पेन प्रथमधकारस्य लोपे रुन् ध स् इति जाते अट्कुप्वाङ्नुम्व्यवायेऽपि इत्यनेन नकारस्य णत्वं प्राप्तं किञ्च नश्चापदान्तस्य झलि इत्यनेन अनुस्वारोऽपि प्राप्तः। उभयमपि त्रिपादीस्थं सूत्रं किन्तु अट्कुप्वाङ्नुम्व्यवायेऽपि (८.४.२) इति णत्वविधायकसूत्रस्य परत्रिपादीत्वात् (८.३.२४) इति अनुस्वारविधायकपूर्वत्रिपादीस्थसूत्रं प्रति णत्वस्य असिद्धत्वात् अनुस्वार एव भवति। तस्य च अनुस्वारस्य अनुस्वारस्य ययि परसवर्णः इत्यनेन परसवर्णे नकारे सकारस्य रुत्वे रेफस्य च विसर्गे कृते **रुन्धः** इति रूपं भवति। यदा तु धकारस्य लोपाभावः तदा प्रथमधकारस्य जश्त्वे दकारे **रुन्द्धः** इति रूपं भवति। एवमेव थसि थे च प्रक्रिया ज्ञेया।

{सूत्रम्. **झरो झरि सवर्णे** (८.४.६५) = हलः परस्य झरो वा लोपः सवर्णे झरि।}

बहुवचने झिप्रत्यये झस्य अन्तादेशे श्नमि अनुबन्धलोपे रुनध् अन्ति इति जाते सार्वधातुकमपित् इत्यनेन अन्ति इति ङित् अस्ति। अतः श्नसोरल्लोपः इत्यनेन नकारोत्तरवर्तिनः अकारस्य लोपे रुन् ध् अन्ति इति जाते नश्चापदान्तस्य झलि इत्यनेन नकारस्य अनुस्वारे तस्य च परसवर्णे नकारे **रुन्धन्ति** इति रूपं भवति।

सिपि श्नमि रुनध् सि इति जाते सिपः पित्त्वात् सार्वधातुकमपित् इत्यस्याप्रवृत्तौ श्नसोरल्लोपः इत्यस्यापि अप्रवृत्तिः। नकारस्य णत्वे धकारस्य जश्त्वे दकारे रुणद् सि इति जाते सकारपरकत्वात् दकारस्य स्थाने खरि च इत्यनेन चर्त्वे तकारादेशे रुणत् सि इति जाते वर्णसम्मेलने **रुणत्सि** इति रूपं भवति।

मिपि श्नमि रुनध् मि इति जाते मिपः पित्त्वात् सार्वधातुकमपित् इत्यस्याप्रवृत्तौ श्नसोरल्लोपः इत्यस्यापि अप्रवृत्तिः। नकारस्य णत्वे धकारस्य जश्त्वे दकारे रुणद् मि इति जाते वर्णसम्मेलने **रुणध्मि** इति रूपं भवति।

वसि श्नमि रुनध् वस् इति जाते सार्वधातुकमपित् इत्यनेन वसः ङित्त्वात् श्नसोरल्लोपः इत्यनेन नकारोत्तरवर्तिनः अकारस्य लोपे नश्चापदान्तस्य झलि इत्यनेन नकारस्य अनुस्वारे अनुस्वारस्य ययि परसवर्णः इत्यनेन अनुस्वारस्य परसवर्णे नकारे सकारस्य रुत्वे रेफस्य च विसर्गे कृते **रुन्ध्वः** इति रूपं सिध्यति। एवमेव मसि बोद्धव्यम्।

तथा हि लटि परस्मैपदे रूपाणि - **रुणद्धि, रुन्धः/रुन्द्धः, रुन्धन्ति। रुणत्सि, रुन्धः/रुन्द्धः, रुन्ध/रुन्द्ध। रुणध्मि, रुन्ध्वः, रुन्ध्मः।**

अत्र अवधेयम् - रुध्-धातोः स्वरितेत्त्वात् स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यनेन क्रियाफलस्य कर्तृगामित्वे रुध्-धातोः विहितस्य लस्य स्थाने आत्मनेपदप्रत्ययो भवति। क्रियाफलस्य परगामित्वे तु शेषात्कर्तरि परस्मैपदम् इत्यनेन परस्मैपदप्रत्ययो भवति।

आत्मनेपदस्थले न कोऽपि पित्प्रत्ययः। अतः सार्वधातुकमपित् इत्यनेन नवानाम् अपि आत्मनेपदप्रत्ययानां ङिद्वद्भावः। तेन श्नसोरल्लोपः इत्यनेन नकारोत्तरवर्तिनः अकारस्य लोपः। प्रथमपुरुषैकवचने तप्रत्यये प्रक्रियया रुन् ध् ते इति जाते झषस्तथोर्धोऽधः इत्यनेन तकारस्य स्थाने धकारादेशे रुन् ध् धे इति जाते झरो झरि सवर्णे इत्यनेन विकल्पेन प्रथमधकारलोपे नस्य अनुस्वारे तस्य च परसवर्णे **रुन्धे** इति रूपम्। धकारलोपाभावपक्षे प्रथमधकारस्य जश्त्वे दकारे **रुन्द्धे** इति रूपम् सिध्यति। बहुवचने झप्रत्यये प्रक्रियया रु न् ध् झ इति जाते आत्मनेपदेष्वनतः इत्यनेन झस्य अत् इत्यादेशे रु न् ध् अत् अ इति जाते टेः एत्वे **रुन्धते** इति रूपम् सिध्यति। अन्येषाम् प्रक्रियाः स्वयं बोद्धव्याः।

तथा हि लटि आत्मनेपदे रूपाणि - **रुन्धे/रुन्द्धे, रुन्धाते, रुन्धते। रुन्त्से, रुन्धाथे, रुन्ध्वे/रुन्द्ध्वे। रुन्धे, रुन्ध्वहे, रुन्ध्महे।**

लिटि तिपि णलि धातोर्द्वित्वे हलादिशेषे लिटः आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन रुध् इत्यस्य रेफोत्तरवर्तिनः उकारस्य गुणे ओकारे **रुरोध** इति रूपं भवति। सिपि थलि प्रक्रियया रु रोध् थ इति जाते आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधे क्रादिनियमानुसारम् नित्यम् इडागमे **रुरोधिथ** इति रूपम् सिध्यति। एवमेव वसि मसि च इडागमः। अत्र प्रक्रियार्थम् तुद्धातुरूपाणि द्रष्टव्यानि।

तथा च परस्मैपदे रूपाणि - **रुरोध, रुरुधतुः, रुरुधुः। रुरोधिथ, रुरुधथुः, रुरुध। रुरोध, रुरुधिव, रुरुधिम।**

आत्मनेपदस्थले च न कश्चित् विशेषः। तथा च रूपाणि – **रुरुधे, रुरुधाते, रुरुधिरे। रुरुधिषे, रुरुधाथे, रुरुधिध्वे। रुरुधे, रुरुधिवहे, रुरुधिमहे।**

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

लुटि तिपि श्नम्-अपवादे तासि तासः आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन लघूपधगुणे रोध् तास् आ इति जाते डित्त्वसामर्थ्यात् अभस्यापि टेर्लोपे रोध् त् आ इति जाते तासः तकारस्य स्थाने झषस्तथोर्धोऽधः इत्यनेन धकारादेशे पूर्वधकारस्य जश्त्वे वर्णसम्मेलने **रोद्धा** इति रूपं भवति। एवम् अग्रेऽपि परस्मैपदे रूपाणि स्वयं साधनीयानि। अत्र तासः आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः।

तथा हि परस्मैपदे रूपाणि - **रोद्धा, रोद्धारौ, रोद्धारः। रोद्धासि, रोद्धास्थः, रोद्धास्थ। रोद्धास्मि, रोद्धास्वः, रोद्धास्मः।**

आत्मनेपदे रूपाणि च - **रोद्धा, रोद्धारौ, रोद्धारः। रोद्धासे, रोद्धासाथे, रोद्धाध्वे। रोद्धाहे, रोद्धास्वहे, रोद्धास्महे।**

लृटि श्नम्प्रत्ययापवादः तास्प्रत्ययो भवति। तस्य च आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः। पुनः तासः आर्धधातुकत्वात् पुगन्तलघूपधस्य च इति लघूपधगुणे ओकारः। किञ्च खरि च इति रुधः धकारस्य चर्त्वे तकारः।

तथा च परस्मैपदे रूपाणि - **रोत्स्यति, रोत्स्यतः, रोत्स्यन्ति। रोत्स्यसि, रोत्स्यथः, रोत्स्यथ। रोत्स्यामि, रोत्स्यावः, रोत्स्यामः।**

आत्मनेपदे रूपाणि च – **रोत्स्यते, रोत्स्येते, रोत्स्यन्ते। रोत्स्यसे, रोत्स्येथे, रोत्स्यध्वे। रोत्स्ये, रोत्स्यावहे, रोत्स्यामहे।**

लोटि परस्मैपदस्थले एरुः इत्यनेन उत्वे धत्वे जश्त्वे णत्वे **रुणद्धु** इति रूपम्, (तातङि) **रुन्धात्/रुन्द्धात्** इति रूपाणि। सिपि सेर्ह्यपिच्च इत्यनेन सेः हि इत्यादेशो भवति स अपित्, ततः हुझल्भ्यो हेर्धिः इत्यनेन हेः स्थाने धि इत्यादेशो भवति सोऽपि अपित्। ततः धेः सार्वधातुकमपित् इत्यनेन ङिद्वद्भावे श्नसोरल्लोपः इत्यनेन श्नस्य अकारस्य लोपे रु न् ध् धि इति जाते पूर्वधकारस्य झरो झरि सवर्णे इति वैकल्पिकलोपे अपदान्तनकारस्य अनुस्वारे परसवर्णे च कृते **रुन्धि** इति रूपम्, धलोपाभावपक्षे पूर्वधकारस्य जश्त्वे **रुन्द्धि** इति रूपम्, तातङ्पक्षे च **रुन्धात्, रुन्द्धात्** इति रूपद्वयम् इति साकल्येन चत्वारि रूपाणि। उत्तमपुरुषे आडुत्तमस्य पिच्च इत्यनेन आडागमे तस्य च पित्त्वात् ङिद्वद्भावो न भवति। अतः अकारलोपो न भवति।

तथा च परस्मैपदे रूपाणि - **रुणद्धु/रुन्धात्/रुन्द्धात्, रुन्धाम्/रुन्द्धाम्, रुन्धन्तु। रुन्धि/रुन्द्धि/रुन्धात्/रुन्द्धात्, रुन्धम्/रुन्द्धम्, रुन्ध/रुन्द्ध। रुणधानि, रुणधाव, रुणधाम।**

आत्मनेपदे रूपाणि च स्वयं साध्यन्ताम् – **रुन्धाम्/रुन्द्धाम्, रुन्धाताम्, रुन्धताम्। रुन्त्स्व, रुन्धाथाम्, रुन्ध्वम्/रुन्द्ध्वम्। रुणधै, रुणधावहै, रुणधामहै।**

लङि अटि तिपः श्नमि नकारस्य णत्वे इतश्च इत्यनेन तेः इकारस्य लोपे अरुणध् त् इति जाते हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इत्यनेन अपृक्ततकारलोपे पदान्तस्य धकारस्य झलां जशोऽन्ते इत्यनेन जश्त्वे दकारे वाऽवसाने इत्यनेन दकारस्य विकल्पेन चर्त्वे तकारे **अरुणत्,** चर्त्वाभावपक्षे

अरुणद् इति साकल्येन रूपद्वयं भवति। एवमेव सिपि प्रक्रिया ज्ञेया। परन्तु अत्र सिपि अस्ति कश्चित् विशेषः तं प्रदर्शयितुमिदं सूत्रमारभ्यते -

[२२.११] दश्च॥ (८.२.७५)

सूत्रार्थः - धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् पदद्वयमस्ति। दः (६/१), च इति सूत्रगतपदच्छेदः। सूत्रेऽस्मिन् सिपि धातो रुर्वा इति सूत्रमनुवर्तते। सिपि (७/१) धातोः (६/१) रुः (१/१) वा(अव्ययम्) इति तस्य पदच्छेदः। पदस्य (६/१) इत्यपि अधिक्रियते। दः इति धातोः विशेषणमस्ति, अतः तदन्तविधौ दकारान्तस्य धातोः इत्यर्थलाभः। तथा च सूत्रार्थस्तावत् दकारान्तस्य पदसंज्ञकस्य धातोः स्थाने विकल्पेन रु इत्यादेशो भवति सिपि परे। अलोऽन्त्यस्य इति परिभाषया अयमादेशः दकारान्तधातोः अन्त्यस्यैव अलः स्थाने अर्थात् दकारस्य स्थाने भवति।

उदाहरणे सूत्रार्थसमन्वयः - रुध्-धातोः लङि अटि सिपि श्नमि नस्य णत्वे सेः इकारलोपे अपृक्तसकारलोपे पदान्तधकारस्य झलां जशोऽन्ते इत्यनेन जश्त्वे दकारे वाऽवसाने इत्यनेन दकारस्य विकल्पेन चर्त्वे तकारे **अरुणत्** इति रूपम्, चर्त्वाभावपक्षे **अरुणद्** इति रूपम्। अरुणद् इत्यस्य तिङन्तत्वात् पदसंज्ञायाम् दश्च इत्यनेन पदान्तदकारस्य रुत्वे **अरुणः** इति रूपमपि भवति एवञ्च सिपि साकल्येन रूपत्रयं भवति। अन्यत्र तथा विशेषो नास्ति।

तथा च लङि परस्मैपदे रूपाणि - **अरुणत्/अरुणद्, अरुन्धाम्/अरुन्द्धाम्, अरुन्धन्। अरुणः/अरुणत्/अरुणद्, अरुन्धम्/अरुन्द्धम्, अरुन्ध/अरुन्द्ध। अरुणधम्, अरुन्ध्व, अरुन्ध्म।**

आत्मनेपदे रूपाणि च - **अरुन्ध/अरुन्द्ध, अरुन्धाताम्, अरुन्धत। अरुन्धाः/अरुन्द्धाः, अरुन्धाथाम्, अरुन्ध्वम्/अरुन्द्ध्वम्। अरुन्धि, अरुन्ध्वहि, अरुन्ध्महि।**

विधिलिङि तिपि श्नम्प्रत्यये यासुटि सुटि इकारलोपे रु न ध् यास् स् त् इति जाते तिपः ङित्त्वात् सार्वधातुकत्वात् च श्नसोरल्लोपः इत्यनेन नकारोत्तरवर्तिनः अकारस्य लोपे लिङः स लोपोऽनन्त्यस्य इत्यनेन सकारद्वयस्यापि लोपे **रुन्ध्यात्** इति रूपं सिध्यति। एवम् अग्रेऽपि। अत्र आत्मनेपदे रूपाणां प्रक्रियायै सुधातुरूपाणि द्रष्टुम् शक्यानि।

तथा च परस्मैपदे रूपाणि - **रुन्ध्यात्, रुन्ध्याताम्, रुन्ध्युः। रुन्ध्याः, रुन्ध्यातम्, रुन्ध्यात। रुन्ध्याम्, रुन्ध्याव, रुन्ध्याम।**

आत्मनेपदे च रूपाणि – **रुन्धीत, रुन्धीयाताम्, रुन्धीरन्। रुन्धीथाः, रुन्धीयाथाम्, रुन्धीध्वम्। रुन्धीय, रुन्धीवहि, रुन्धीमहि।**

आशीर्लिङः लिङाशिषि इत्यनेन आर्धधातुकत्वात् श्नम् न भवति। अपि च लिङः स-लोपोऽनन्त्यस्य इत्यपि न प्रवर्तते। तथा च परस्मैपदे रूपाणि - **रुध्यात्, रुध्यास्ताम्, रुध्यासुः। रुध्याः, रुध्यास्तम्, रुध्यास्त। रुध्यासम्, रुध्यास्व, रुध्यास्म।**

स्वादितः रुधादिपर्यन्तम्- सु तुद् रुध् धातवः

आत्मनेपदस्थले प्रथमपुरुषैकवचनविवक्षायाम् तप्रत्यये लिङः सीयुट् इति सीयुडागमो भवति। ततः सुट्तिथोः इति सुडागमो भवति। ततः रुध् सीय् स् त इति जायते। यदागमपरिभाषया अत्र सीय् स् त इति समुदायः तिङ्-प्रत्ययः। लिङाशिषि इति सूत्रेण लिङादेशस्य तिङः आर्धधातुकसंज्ञा भवति। अतः सीय् स् त इति समुदायस्य आर्धधातुकसंज्ञायाम् आर्धधातुकस्येड् वलादेः इति सूत्रेण इडागमे प्राप्ते एकाच उपदेशेऽनुदात्तात् इति तन्निषेधः। ततः लोपो व्योर्वलि इति सीयुटः यकारलोपे रुध् सी स् त इति जाते आदेशप्रत्यययोः इति सीयुटः सकारस्य षत्वे तकारस्य ष्टुत्वे टकारे सीयुटः सकारस्य खत्वात् तस्मिन् परे खरि च इत्यनेन रुधः धकारस्य तकारे **रुत्सीष्ट** इति रूपं भवति। एवम् अन्यत्रापि स्वयं बोद्ध्यम्।

तथा हि आत्मनेपदे रूपाणि - **रुत्सीष्ट, रुत्सीयास्ताम्, रुत्सीरन्। रुत्सीष्ठाः, रुत्सीयास्थाम्, रुत्सीध्वम्। रुत्सीय, रुत्सीवहि, रुत्सीमहि।**

लुङि परस्मैपदस्थले अटि तिपि श्नमपवादे च्लौ च्लेः सिच् इति सिचि प्राप्ते तं प्रबाध्य इरितो वा इत्यनेन च्लेः स्थाने विकल्पेन **अङादेशे** अ रुध् अ ति इति जाते तिपः इकारस्य लोपे **अरुधत्** इति रूपं भवति। अत्र ङित्त्वात् न लघूपधगुणः। किञ्च अङः वलादित्वाभावात् न इडागमः। अपि च अपृक्ततकारस्य ईडागमोऽपि न सिजभावात्। अग्रे तसादौ न कोऽपि विशेषः। आत्मनेपदस्थले तु **इरितो वा** इति न प्रवर्तते तस्य परस्मैपदस्थले एव विधानात्।

तथा च परस्मैपदे अङादेशे रूपाणि - **अरुधत् अरुधताम्, अरुधन्। अरुधः, अरुधतम्, अरुधत। अरुधम्, अरुधाव, अरुधाम।**

अङभावपक्षे च्लेः स्थाने सिचि वदव्रजहलन्तस्याचः इत्यनेन वृद्धौ धकारस्य चर्त्वे - **अरौत्सीत्, अरौद्धाम्, अरौत्सुः। अरौत्सीः, अरौद्धम्, अरौद्ध। अरौत्सम्, अरौत्स्व, अरौत्स्म।** अत्र सिचः आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः।

आत्मनेपदस्थले लिङ्सिचावात्मनेपदेषु इत्यनेन सिचः कित्त्वात् न लघूपधगुणः। प्रथमपुरुषैकवचने तप्रत्यये प्रक्रियया अ रुध् स् त इति जाते झलो झलि इति सकारलोपः। ततः तकारस्य धकारे अ रुध् ध इति जाते पूर्वधकारस्य जश्त्वे दकारे **अरुद्ध** इति रूपम् सिध्यति। एवम् अन्यत्रापि विद्यार्थिना स्वयम् ऊह्यम्। तथा च आत्मनेपदे रूपाणि - **अरुद्ध, अरुत्साताम्, अरुत्सत। अरुद्धाः, अरुत्साथाम्, अरुद्ध्वम्। अरुत्सि, अरुत्स्वहि, अरुत्स्महि।**

लृङि अटि तिपि श्नमपवादे स्यप्रत्यये स्यस्य आर्धधातुकत्वात् पुगन्तलघूपधस्य च इत्यनेन गुणे ओकारे धकारस्य चर्त्वे तकारे तिपः इकारलोपे **अरोत्स्यत्** इति रूपं भवति। लुङि श्नम्प्रत्ययापवादः स्यप्रत्ययो भवति। तस्य च आर्धधातुकत्वात् स्वयम् वलादित्वात् च आर्धधातुकस्येड्वलादेः इति प्राप्तस्य इडागमस्य एकाच उपदेशेऽनुदात्तात् इति निषेधः। अत्र उभयविधस्थलेऽपि न तथा विशेषः।

तथा च परस्मैपदे रूपाणि - **अरोत्स्यत्, अरोत्स्यताम्, अरोत्स्यन्। अरोत्स्यः, अरोत्स्यतम्, अरोत्स्यत। अरोत्स्यम्, अरोत्स्याव, अरोत्स्याम।**

आत्मनेपदे रूपाणि च – **अरोत्स्यत, अरोत्स्येताम्, अरोत्स्यन्त। अरोत्स्यथाः, अरोत्स्येथाम्, अरोत्स्यध्वम्। अरोत्स्ये, अरोत्स्यावहि, अरोत्स्यामहि।**

पाठगतप्रश्नाः-३

२१. रुधादिगणीयधातुभ्यः कः विकरणप्रत्ययो विधीयते।

२२. दश्च इति सूत्रस्य कोऽर्थः।

२३. रुध्-धातोः शप्रत्ययविधायकसूत्रं किम्।

२४. रुध्-धातोः कोऽर्थः।

२५. रुणद्धि इत्यत्र णत्वं केन।

२६. अरुधत् इत्यत्र च्लेः स्थाने अङ् चङ् इत्यनयोः कः आदेशो भवति।

२७. रुध्-धातोः परस्मैपदे लङि सिपि कति रूपाणि।

२८. श्नमः मित्करणेन किं भवति।

२९. रुध्धातोः परस्मैपदे लुङि तिपि कति रूपाणि।

३०. श्नसोरल्लोपः इत्यस्य कोऽर्थः।

पाठसारः

अस्मिन् पाठे स्वादिगणः, तुदादिगणः, रुधादिगणः इति गणत्रयस्य आलोचना विहिता। तत्रादौ सु-धातोः विषये आलोचनं विहितम्। तत्रापि आदौ सु-धातोर्विषये स्वादिभ्यः श्नुः इति विकरणप्रत्ययविधायकं सूत्रमालोचितम्। ततः हुश्नुवोः सार्वधातुके, लोपश्चास्यान्यतरस्यां म्वोः, उतश्च प्रत्ययादसंयोगपूर्वात् इत्यादीनि सूत्राणि व्याख्यातानि। अनन्तरम् सुधातोः लुङि तिपि असावीत् इति रूपसाधनकाले स्तुसुधूञ्भ्यः परस्मैपदेषु इति सूत्रं व्याख्यातम्। ततः तुद्-धातोः विषये आलोचनं कृतम्। तत्र तुद्-धातोः विषये तुदादिभ्यः शः इति शविकरणविधायकसूत्रस्य व्याख्यानं विहितम्। ततः लिङ्सिचावात्मनेपदेषु इति सूत्रं व्याख्यातम्। तेन तुत्सीष्ट इति रूपं सिध्यति। ततः रुध्धातोः आलोचना कृता। तत्र च आदौ रुधादिभ्यः श्नम् इति श्नम् - विकरणविधायकसूत्रस्य व्याख्या कृता। ततः झषस्तथोर्धोऽधः इति सूत्रम् व्याख्यातम्। सार्वधातुके क्ङिति श्नस्य अकारलोपविधायकं श्नसोरल्लोपः इति सूत्रं व्याख्यातम्। अग्रे रुध्धातोः लङि सिपि विशेषं प्रदर्शयितुं दश्च इति सूत्रस्य व्याख्यानं विहितम्।

तेन् अरुणः-अरुणत्-अरुणद् इति रूपत्रयं सिध्यति। पाठेऽस्मिन् न समेषां रूपाणां ससूत्रं प्रक्रियाः प्रदर्शिताः, ताः स्वयं साध्याः। किञ्च अस्मिन् तत्तद्गणीयः प्रथमः धातुरेव यथासम्भवं सविस्तरं व्याख्यातोऽस्ति। तेन तत्तद्गणीयानाम् अन्येषामपि धातूनाम् रूपसिद्धिं कर्तुम् प्रभवेत्। भवन्तः दृष्टवन्तः कस्माचित् धातोः शप्रत्ययः, कस्माच्चित् वा श्नुप्रत्ययः, कस्माच्चिद्वा श्नम्प्रत्ययो भवति। इमे सर्वेऽपि प्रत्ययाः अपितो भवन्ति। शितोऽपि सन्ति। तस्मात् सार्वधातुकमपित् इत्यनेन एषां ङिद्वद्भावः भवति। अस्य किं फलमिति तु पूर्वम् उक्तमेवास्ति।

पाठान्तप्रश्नाः

१. स्तुसुधूञ्भ्यः परस्मैपदेषु इति सूत्रं सोदाहरणं व्याख्यात।

२. हुश्नुवोः सार्वधातुके इति सूत्रं सोदाहरणं व्याख्यात।

३. लोपश्चास्यान्यतरस्यां म्वोः इति सूत्रं सोदाहरणं व्याख्यात।

४. उतश्च प्रत्ययादसंयोगपूर्वात् इति सूत्रं सोदाहरणं व्याख्यात।

५. तुदति इति धातुरूपस्य प्रक्रिया लेख्या।

६. तुत्सीष्ट इति धातुरूपस्य प्रक्रिया लेख्या।

७. अतौत्ताम् इति धातुरूपस्य प्रक्रिया लेख्या।

८. तुद्याः इति धातुरूपस्य प्रक्रिया लेख्या।

९. लिङ्सिचावात्मनेपदेषु इति सूत्रं सोदाहरणं व्याख्यात।

१०. श्नसोरल्लोपः इति सूत्रं सोदाहरणं व्याख्यात।

११. सुनोति इति धातुरूपस्य प्रक्रिया लेख्या।

१२. अतौत्सीत् तुत्सीष्ट इति धातुरूपस्य प्रक्रिया लेख्या।

१३. सुन्वन्ति इति धातुरूपस्य प्रक्रिया लेख्या।

१४. सुधातोः परस्मैपदे लिटि थलि कति रूपाणि तेषां सिद्धिः कार्या।

१५. सुन्वः, सुनुवः इत्यनयोः रूपसिद्धिः कार्या।

१६. असोढ्वम् इति धातुरूपस्य सिद्धिः कार्या।

१७. रुणद्धि इति धातुरूपस्य प्रक्रिया लेख्या।

१८. रुध्-धातोः लङि सिपि कति रूपाणि भवन्ति तेषां प्रक्रियाः लेख्याः।

१९. रुध्-धातोः लुङि तिपि कति रूपाणि भवन्ति तेषां प्रक्रियाः लेख्याः।

२०. रुधादिभ्यः श्नम् इति योगम् सोदाहरणं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि- १

१. श्नु इति विकरणप्रत्ययः।

२. सिचः इडागमं विदधाति।

३. अभिषवः।

४. स्वादिभ्यः श्नुः।

५. असावीत्।

६. सुन्महे/सुनुमहे।

७. सुषविथ/सुषोथ।

८. तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञा यथा स्यात्।

९. आशीर्लिङः आर्धधातुकत्वात्।

१०. अकृत्सार्वधातुकयोर्दीर्घः इत्यनेन।

उत्तराणि- २

११. श इति विकरणप्रत्ययः।

१२. इक्समीपाद्धलः परौ झलादिलिङात्मनेपदपरः सिच्चेत्येतौ कितौ स्तः।

१३. तुदादिभ्यः शः।

१४. व्यथनम्।

१५. अतौत्सीत्।

१६. तुत्सीष्ठाः।

१७. तुतुदिध्वे।

१८. तिङ्शित्सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञाविधानम्।

१९. तुत्सीष्ट।

२०. शप्रत्ययस्य अपित्त्वात् सार्वधातुकमपित् इत्यनेन ङित्त्वात् क्ङिति च इति गुणनिषेधः।

उत्तराणि- ३

२१. श्नम्-विकरणप्रत्ययः।

२२. धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा।

२३. रुधादिभ्यः श्नम्।

२४. आवरणम्।

२५. अट्कुप्वाङ्नुम्व्यवायेऽपि।

२६. अङ्।

२७. अरुणः/अरुणत्/अरुणद् इति रूपत्रयम्।

२८. मित्त्वात् मिदचोऽन्त्यात्परः इति परिभाषया अन्त्याद् अचः परो भवति

२९. (अङि) अरुधत् - (सिचि) अरौत्सीत्।

३०. श्नस्यास्तेश्चाकारस्य लोपः स्यात् सार्वधातुके क्ङिति।

॥ इति द्वाविंशः पाठः ॥